कारिका। वच् कुष्ठम् ॥*॥ अथ सन्धिगस्य चिकित्सा।

"शटीपुष्करतरूत्तमाः खदिरदारुरास्नाः समाः सनागरसुधान्विताः पिब शतावरीसंयुताः। मृदुज्वलनपाचिताः सह पुरेण सन्धिग्रह-व्यथापहतये त्वया शिशिरसेवनं मा कृथाः॥"

उत्तमा त्रिफला। खदिरदारु लिचारा इति लोके। सुधा गुड़ूची। पुरो गुग्गुलुः।

"वचाकवचकच्छुरासहचरामृताभङ्गुरा-सुराह्वघननागरातरुणदारुरास्नापुराः। वृषातरुणभीरुभिः सह भवन्ति सन्धिग्रह-व्यथोरुजड़िमक्लमभ्रमणपक्षघातद्रुहः॥"

कवचः पर्प्पटकः। कच्छुरा यवासः। भङ्गुरा अतिविषा। सुराह्वं देवदारु। अतरुणदारु हस्वदारु। पुरो गुग्गुलुः। वृषा लघुदन्ती एरण्डवत् पत्रविटपा तदलाभे दन्ती च ग्राह्या समानगुणत्वात्। तरुण एरण्डः। भीरुः शतावरी।

"सुरदारु शटी सुधालता
सुवहा शुण्ठियुता शृता जले।
सपुराः शमयन्ति सेविताः
सततं सन्धिगतं सदागतिम्॥"

सुवहा रास्ना।

"मुस्तैरण्डशताह्वादावाणदारु-
च्छिन्नारास्नाभीरुकर्चूरतिक्ताः।
वासा विश्वा पञ्चमूलीयुगाख्या
हन्त्याशन्यास्तम्भसन्धिग्रहार्त्तीः॥"

शाह्वदा हरितकी। बाणः नीलपुष्पसहचरः। तिक्ता कटुका॥*॥ अथान्तके विधिः।

"इहापहाय व्रतमुष्णवारि
ज्वरारिपूयादिगदापहारि।
ज्वरच्छिदं जीवितदस्य नित्यं
मृत्युञ्जयं चेतसि चिन्तयस्व॥"

इह अन्तके व्रतं लङ्घनादिनियमम्।

"कर्पूरप्रकरावदातवपुषं सद्योगमुद्राजुषं शश्वद्भक्तजनेषु भावुकजुषं भालस्फुरच्चक्षुषम्। संपूर्णामृतकुम्भसम्भृतकरं शुभ्राक्षमालाधरं गङ्गोत्तुङ्गजटाकलापरुचिरं चन्द्रार्द्धमौलिं स्तुहि॥
भिषग्भिरिति निर्णीते सन्निपातेऽन्तकाभिधे। भेषजं जाह्नवीनीरं वैद्यो गोविन्द एव हि॥"*

अथ तृड्दाहस्य चिकित्सा।

"उशीरचन्दनोदीच्यद्राक्षामलकपर्प्पटैः। शृतं शीतं जलं दद्याद्दाहतृड्ज्वरशान्तये॥"
इति षड़ङ्गपानम्॥*॥

"शशितो निशि पर्य्युषितः प्रातर्धान्याक-तण्डुल क्वाथः। पीतः शमयत्यचिरादन्तर्दाहं ज्वरं पक्तम्॥"

धान्याकतण्डुलाः कण्डितधान्यकानि। इति धान्याकक्वाथः॥*॥

"पथ्यां तैलघृतक्षौद्रैर्लिहन् दाहज्वरापहाम्। कासासृक्पित्तवीसर्पं श्वासान् हन्ति वमीमपि॥"

तैलघृतक्षौद्रैरित्यत्र न समुच्चयः क्षौद्रेण केवलेन मधुनापि लिह्यात्। इति पथ्यावलेहः॥*॥

"प्रशमयति दाहमचिरात् दधियुक्काञ्जिकाम्बु-पल्लवैर्लेपः। लेपो हिमकरमलयजनिम्बदलैस्तक्रपिष्टैर्वा॥"

हिमकरः कर्पूरः। तथा च घनसारश्चन्द्रसंज्ञ इत्यमरः॥

"उत्तानसुप्तस्य गभीरताम्र-
कांस्यादिपात्रे निहिते च नाभौ।
शीताम्बुधारा बहुला पतन्ती
निहन्ति दाहं त्वरितं ज्वरञ्च॥
शीताम्भसा तु शतशश्च विलोड़ितेन
गव्येन चन्दनयुतेन घृतेन दिग्धा।
दाहज्वरी सकमलोत्पलमाल्यधारी
क्षिप्रं विशेत् सलिलकोष्ठमनल्पकालम्॥
काञ्जिकार्द्रपटेनावगुण्ठनं दाहनाशनम्।
अथ गीतकसंक्लिन्नशीतलीकृतवाससा॥"*॥

अथान्नमाह।

"दाहावमर्दितं क्षामं निरन्नं तृष्णयान्वितम्। शर्करामधुसंयुक्तं पाययेल्लाजतर्पणम्॥"

लाजतर्पणं लाजशक्तुभिरुपतर्पणम्।

"वाप्यः कमलहासिन्यो जलयन्त्रगृहाः शुभाः। नार्य्यश्चन्दनदिग्धाङ्ग्यो दाहदैन्यहरा मताः॥
मुक्तावली चन्दनशीतलानां
सुगन्धपुष्पाम्बरभूषितानाम्।
नितम्बिनीनां सुपयोधराणा-
मालिङ्गनान्याशु हरन्ति दाहम्॥
प्रह्लादं चास्य विज्ञाय ताः स्त्रीरपनयेत् पुनः। हितञ्च भोजयेदन्नं येनाप्नोति सुखं महत्॥"

प्रह्लादकं कामकृतं हर्षम्॥*॥ अथ चित्तभ्रमस्य चिकित्सा।

"कणोषणोशालवणोत्तमानि
करञ्जबीजं चणदामलानि।
पथ्याद्यसिद्धार्थकहिङ्गुशुण्ठी-
युतानि वस्ताम्बुविमिश्रितानि॥
पिष्ट्वा गुटीयं नयने विधेया
प्रचेतनेति प्रथितान्वितार्था।
चित्तभ्रमापस्मृतिभूतदोष-
शिरोऽक्षिरोगभ्रमनाशहेतुः॥"

वस्ताम्बु छागमूत्रम्।

"कुम्भोद्भवतरोरम्भोगुड़विश्वाकणान्वितम्। निहितं नसि नूनं स्यात् चित्तभ्रमविनाशनम्॥"

कुम्भोद्भवतरोरम्भः अगस्तिवृक्षत्वक्कल्करसः।

"सुरामूर्द्धजमेधाह्वामधूकमलयोद्भवैः। मरुत्तकमधूच्छिष्टैः पुरपाणिजपांशुभिः॥
लोहलामज्जकैलाभिर्धूपश्चित्तभ्रमापहः। ग्रहदोषहरः श्रीदः सौभाग्यकर उत्तमः॥"

सुरा एकाङ्गी। मूर्द्धजो बाला। मरुत्तकः देवदारुः। पुरः गुग्गुलुः। पाणिजः नखः। पांशुः पर्पटकः। लोहं अगुरुः। लामज्जकं उशीरवत् पीतच्छविदृणविशेषः। तदलाभे उशीरं ग्राह्यम्।

"मृद्वीकामरदारुमत्स्यशकलामुस्तामलक्योऽमृता पथ्यारेवतरामसेनकरजोराजीफलैः संयुताः। हन्युश्चित्तरुजोऽथ दर्द्दुरदला द्राक्षा पटोली पयः
पथ्या पर्पटराजवृक्षकटुकाशम्बूकपुष्पः शृताः॥"

मृद्वीका द्राक्षा। मत्स्यशकला कटुका। आरेवतः आरग्वधः। रामसेनकः किराततिक्तकः। रजः पर्पटकः। राजीफलः पटोलः। अथ योगान्तरमाह। दर्द्दुरदला मण्डूकपर्णी। सा च त्वरार्था ब्राह्मी मञ्जिष्ठा शोणकश्च। तथाप्यत्र ब्राह्मी ग्राह्या। यत उक्तं गुणग्रन्थे। ब्राह्मी मतिप्रदा मेध्या ज्वरहन्त्री रसायनीति ब्राह्मी वरम्भी इति लोके। पयः बालकं राजवृक्ष आरग्वधः। शम्बूकपुष्पी शङ्खपुष्पी॥ * ॥ अथ कर्णकस्य चिकित्सा।

"प्रलेपः समस्तं नयत्यल्पमेकः
समुद्रिक्तशोथस्य रक्तावसेकः।
विपक्वस्य शस्त्रक्रिया पूयजित् सा
व्रणत्वं गतस्य द्रुतं तच्चिकित्सा॥"

अयमर्थः। अल्पं तं कर्णकं एकः प्रलेपः अस्तं नाशं नयति। तच्चिकित्सा व्रणचिकित्सा!

"निशाविशालामयमाणिमन्थ-
दार्वीङ्गुदीमूलकृतः प्रलेपः।
प्रभाकरक्षीरयुतप्रभावाद्-
व्यस्तः समस्तोऽप्यथ कर्णकघ्नः॥"

कुलत्थः कटफलं शुण्ठी कारवी च समांशकैः। सुखोष्णैर्लेपनं कार्य्यं कर्णमूले मुहुर्मुहुः॥
गैरिकं कठिनीशुण्ठीकट्फलैः सवचैः समैः। उष्णैः काञ्जिकसंपिष्टैः प्रलेपः कर्णमूलनुत्॥
शिग्रुराजिकयोः पिष्ट्वा कर्णमूलं प्रलेपयेत्। कर्णमूलभवः शोथस्तेन लेपेन शाम्यति॥
अश्विशिरजलपरिस्रुदितं मरिचकणाजीर-सिन्धुजं त्वरितम्। नस्यविधिसेवितं ननु कर्णकरुक् नाशकृद्-गदितम्॥

भार्गीजयापौष्करकण्टकारी-
कटुत्रिकोग्रावनकुण्डलीभिः।
कुलीरशृङ्गीकटुकारसाभिः
कृतः कषायः किल कर्णकघ्नः॥"

भार्गी वमनेटी इति लोके। तदलाभे कण्टकारीमूलं ग्राह्यम्। जया गणियार इति लोके। पौष्करं पुष्करमूलम्। उग्रा वचा। कुण्डली गुड़ूची। कुलीरशृङ्गी कर्कटशृङ्गी। रसा रास्ना।

"दशमूलमत्स्यशकलाचपला-
त्रिफलामहौषधिकिरातयुतम्।
मरिचं परिक्वथितमाशु बला-
दपहन्ति कर्णरुजः सकला॥"

चपला पिप्पली॥ * ॥ अथ कण्ठकुब्जस्य चिकित्सा।

"फलत्रिकत्र्यूषणमुस्तकाहि-
कलिङ्गसिंहाननशर्व्वरीभिः।